# विभक्तिः

१५ – ०२.०४.२०१६

व्योम-संस्कृत-पाठशाला

www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- विभक्तिः – किम्?
- विभक्तिः – कति?
- विभक्तिः – काः?
- विभक्तिः – किमर्थम्?

# पुनरावर्तनम्

- प्रथमाविभक्तिः
  - वस्तुनिर्देशे। सः वृक्षः। एषः बालः।
  - कर्तरि। बालः पठति। सीता गायति।
  - कर्मणि। पाठः पठनीयः। शाला गन्तव्या।
- द्वितीयाविभक्तिः
  - कर्मणि। पाठं पठति। गृहं गच्छति।
  - द्विकर्मकाः। गुरुं प्रश्नं पृच्छति। स्यूतं शालां नयति।
  - उपपदद्वितीया। ग्रामं परितः वनम् अस्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- तृतीयाविभक्तिः
  - करणे। हस्तेन खादति। नासिकया जिघ्रति।
  - भाववाचकेभ्यः। कोपेन वदति। संशयेन पश्यति।
  - कर्तरि। बालेन खादितम्। मया उक्तम्।
  - उपपदतृतीया। बालेन सह। सीतया विना। फलेन अलम्।

# अभ्यासः - १



- एषः कः?
- किं करोति?
- किं धरति?
- कीदृशं पुस्तकम्?
- पुस्तकं केन गृह्णाति?

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - १



- एषा का?
- किं करोति?
- कथं नृत्यति?

# अभ्यासः - १



- एते के?
- किं कुर्वन्ति?
- कथं धावन्ति?

# अभ्यासः - १



- एषः कः?
- किं करोति?
- केन लिखति?

# अभ्यासः - २

(एतद्) ग्रामः। ग्रामः (सुन्दर) अस्ति। ग्रामे २०० (जन) वसन्ति। (तत्) जनाः कृषिकार्यं कुर्वन्ति। कृषिकार्यै साहाय्यार्थं धेनूः (वृषभ) च पालयन्ति। (ग्राम) परितः तेषां (क्षेत्र) सन्ति। समीपे एव नदी प्रवहति। नद्याः (जल) विना सस्यानि न रोहन्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - २

- वयं छात्राः। (अस्मद्) सम्यक् अध्ययनं कर्तव्यम्। पाठाः (श्रद्धा) (पठितव्य)। गुरुसेवा (करणीय)। (छात्र) आलस्यं न (प्रदर्शनीय)। धर्मः (पालनीय)। विद्या (अभ्यसनीय)। सत्यमेव (वक्तव्य), न कदाचित् असत्यम्।

# अभ्यासः - २

- कैकेयी (दशरथ) (वरद्वय) पृच्छति। पितुः (आज्ञा) पालयन् रामः (वन) गच्छति। (राम) सह सीता, लक्ष्मणश्च वनं (गम्)। (तत्) त्रयः पञ्चवट्यां वासं कुर्वन्ति। तत्र (शूर्पणखा) रामः (दृष्ट)। शूर्पणखा (सीता) हत्वा (राम) प्राप्तुम् इच्छति। लक्ष्मणः (कोप) शूर्पणखायाः (नासिका) (कर्ण-२) च कर्तयति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- चतुर्थीविभक्तिः
  - सम्प्रदानम् - दानक्रियायाः विषये "कस्मै ददाति" इति प्रश्नस्य उत्तरम्
  - सम्प्रदानवाचकात् चतुर्थीविभक्तिः
  - बालः **मित्राय** पुस्तकं ददाति।
  - छात्रा **अग्रजायै** लेखनीं ददाति।
- रूपाणि
  - बालाय बालाभ्याम् बालेभ्यः
  - बालिकायै बालिकाभ्याम् बालिकाभ्यः
  - मित्राय मित्राभ्याम् मित्रेभ्यः

# सर्वनाम्नां चतुर्थीविभक्तिः

| | | |
|---|---|---|
| तस्मै | ताभ्याम् | तेभ्यः |
| तस्यै | ताभ्याम् | ताभ्यः |
| तस्मै | ताभ्याम् | तेभ्यः |
| एतस्मै | एताभ्याम् | एतेभ्यः |
| एतस्यै | एताभ्याम् | एताभ्यः |
| एतस्मै | एताभ्याम् | एतेभ्यः |
| मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ३

## वाक्यरचना (सर्वेषु वचनेषु)

वस्त्रम्

स: बालकः

चीराणि त्वं तापसी

सा बालिका शाटिका

राजा

पदवी अहं सज्जनः

तत् मित्रम् हारः

अश्वाः एतत् कुटुम्बम्

एषः विप्रः गृहम्

एषा कर्मकरी

नाणकानि

# पुनरावर्तनम्

- सम्प्रदानम् २
  - रुच्-धातोः प्रयोगे यः इच्छति तस्य चतुर्थीविभक्तिः।
  - रामाय पुष्पं रोचते। भगिन्यै सङ्गीतं रोचते।
- सम्प्रदानम् ३
  - क्रुधादीनां प्रयोगे कोपपात्रस्य चतुर्थीविभक्तिः।
  - कृष्णाय क्रुध्यति/द्रुह्यति/ईर्ष्यति/असूयति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ४ (न रोचते)

- रामः – असत्यम्
- अर्जुनः – युद्धम्
- गिरिजा – गङ्गा
- देवाः – असुराः
- असुराः – सत्कार्याणि
- नारायणः - अधर्मः
- ते – हिंसा
- वयम् – आलस्यम्
- सा – प्रेतकथाः
- एताः – शाकानि
- त्वम् – एते
- एषः - अहम्

# अभ्यासः – ५ (क्रुधादयः)




व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# उपपदचतुर्थी - नमः

- रामाय नमः।
- हरये नमः।
- गुरवे नमः।

# अभ्यासः – ६ (नमः)

| | | | |
|---|---|---|---|
| ❧ श्रीरामः | ❧ रमा | ❧ सरस्वती | ❧ देवाः |
| ❧ रामभद्रः | ❧ ललिता | ❧ पार्वती | ❧ देव्यः |
| ❧ रामचन्द्रः | ❧ गङ्गा | ❧ वाणी | ❧ ब्राह्मणाः |
| ❧ रघुनाथः | ❧ गिरिजा | ❧ लक्ष्मीः | ❧ सज्जनाः |
| ❧ सीताकान्तः | ❧ दुर्गा | ❧ गौरी | ❧ ऋषिवराः |
| ❧ हनुमत्प्रियः | ❧ सीता | ❧ काली | ❧ शास्त्रकाराः |

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# रटनम्